श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री कुलशेखरदिव्यसूरिकृता

# ॥ श्री मुकुन्दमाला ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मुकुन्दमाला ॥

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने।
तमहं शिरसा वन्दे राजानं कुलशेखरम्॥

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठनकोविदेति।
नाथेति नागशयनेति जगन्निवासे -
त्यालापनं प्रतिपदं कुरु मे मुकुन्द॥ 1 ॥

जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः॥ 2 ॥

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम्।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत्प्रसादात्॥ 3 ॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम्।
रम्या रामा मृदुतनुलता नन्दने नापि रन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तम्॥ 4 ॥

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद् भव्यं भवतु भगवन् पूर्वकर्मानुरूपम्।
एतत् प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु॥ **5**॥

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामम्।
अवधीरित शारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि॥ **6**॥

कृष्ण त्वदीय पदपङ्कज पञ्जरान्तम्
अद्यैव मे विशतु मानस राजहंसः।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते॥ **7**॥

चिन्तयामि हरिमेव सन्ततं
मन्दमन्द हसिताननाम्बुजम्।
नन्दगोप तनयं परात्परं
नारदादि मुनिबृन्द वन्दितम्॥ **8**॥

करचरणसरोजे कान्तिमन्नेत्रमीने
श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे।
हरिसरसि विगाह्यापीय तेजोजलौघं
भवमरुपरिखिन्नः खेदमद्य त्यजामि॥ **9**॥

सरसिजनयने सशङ्खचक्रे
मुरभिदि मा विरमस्व चित्त रन्तुम्।
सुखतरमपरं न जातु जाने
हरिचरण स्मरणामृतेन तुल्यम्॥ **10**॥

माभीर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातनाः
नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः॥ **11** ॥

भवजलधिगतानां द्वन्द्ववाताहतानां
सुतदुहितृकळत्र त्राणभारार्दितानाम्।
विषमविषयतोये मज्जतामप्लवानां
भवतु शरणमेको विष्णुपोतो नराणाम्॥ **12** ॥

भवजलधिं अगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मास्मगाः कातरत्वम्।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम्॥ **13** ॥

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसंघाकुले च।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ॥ **14** ॥

माद्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान् पदाब्जे
माश्रौषं श्राव्यबन्धं तव चरितमपास्यान्यदाख्यानजातम्।
मास्मार्षं माधव त्वामपि भुवनपते चेतसाऽपह्नुवानान्
माभूवं त्वत्सपर्या व्यतिकर रहितो जन्मजन्मान्तरेऽपि॥ **15** ॥

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युत कथाः श्रोत्रद्वय त्वं शृणु।
कृष्णं लोकय लोचनद्वय हरेर्गच्छांघ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन् नमाधोक्षजम्॥ **16** ॥

हे लोकाश्शृणुत प्रसूति मरणव्याधेश्चिकित्सामिमां
योगज्ञास्समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः।
अन्तर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतां
तत्पीतं परमौषधं वितनुते निर्वाणमात्यन्तिकम् ॥ **17** ॥

हे मर्त्याः परमं हितं शृणुत वो वक्ष्यामि संक्षेपतः
संसारार्णवमापदूर्मिबहुळं सम्यक्प्रविश्य स्थिताः।
नानाज्ञानमपास्य चेतसि नमो नारायणायेत्यमुं
मन्त्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः ॥ **18** ॥

पृथ्वी रेणुरणुः पयांसि कणिकाः फल्गुस्फुलिङ्गोऽनलः
तेजो निःश्वसनं मरुत् तनुतरं रन्ध्रं सुसूक्ष्मं नभः।
क्षुद्रा रुद्रपितामहप्रभृतयः कीटास्समस्तास्सुराः
दृष्टे यत्र स तावको विजयते भूमावधूतावधिः ॥ **19** ॥

बद्धेनाञ्जलिना नतेन शिरसा गात्रैस्सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयनेनोद्गीर्ण बाष्पाम्बुना।
नित्यं त्वच्चरणारविन्दयुगळ ध्यानामृतास्वादिनां
अस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥ **20** ॥

हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्र करुणापारीण हे माधव।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥ **21** ॥

भक्तापायभुजङ्गगारुडमणिः त्रैलोक्यरक्षामणिः
गोपीलोचनचातकाम्बुदमणिः सौन्दर्यमुद्रामणिः।
यः कान्तामणिरुक्मिणीघनकुच द्वन्द्वैकभूषामणिः
श्रेयो देवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ **22** ॥

शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसंपूज्यमन्त्रं
संसारोत्तारमन्त्रं समुपचिततमस्सङ्घनिर्याणमन्त्रम्।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजग सन्दष्ट सन्त्राणमन्त्रं
जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम्॥ **23** ॥

व्यामोहप्रशमौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्येन्द्रार्त्तिकरौषधं त्रिजगतां सञ्जीवनैकौषधम्।
भक्तात्यन्तहितौषधं भवभयप्रध्वंसनैकौषधं
श्रेयः प्राप्तिकरौषधं पिब मनश्श्रीकृष्णदिव्यौषधम्॥ **24** ॥

आम्नायाभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं
मेदश्छेदफलानि पूर्तविधयः सर्वे हुतं भस्मनि।
तीर्थानामवगाहनानि च गजस्नानं विना यत्पद -
द्वन्द्वाम्भोरुहसंस्मृतीः विजयते देवस्स नारायणः॥ **25** ॥

श्रीमन्नाम प्रोच्य नारायणाख्यं
के न प्रापुर्वाञ्छितं पापिनोऽपि।
हा नः पूर्वं वाक्प्रवृत्ता न तस्मिन्
तेन प्राप्तं गर्भवासादिदुःखम्॥ **26** ॥

मज्जन्मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीयमदनुग्रह एष एव।
त्वद्भृत्यभृत्यपरिचारक भृत्यभृत्य
भृत्यस्य भृत्य इति मां स्मर लोकनाथ॥ **27** ॥

नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति।
यं कञ्चित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूका वराका वयम्॥ **28** ॥

मदन परिहर स्थितिं मदीये
मनसि मुकुन्दपदारविन्दधाम्नि।
हरनयन कृशानुना कृशोऽसि
स्मरसि न चक्रपराक्रमं मुरारेः॥ 29 ॥

तत्त्वं ब्रुवाणानि परं परस्मात्
मधु क्षरन्तीव सतां फलानि।
प्रावर्तय प्राञ्जलिरस्मि जिह्वे
नामानि नारायण गोचराणि॥ 30 ॥

इदं शरीरं परिणामपेशलं
पतत्यवश्यं श्लथसन्धिजर्जरम्।
किमौषधैः क्लिश्यसि मूढ दुर्मते
निरामयं कृष्णरसायनं पिब॥ 31 ॥

दारा वाराकरवरसुता ते तनूजो विरिञ्चिः
स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः।
मुक्तिर्माया जगदविकलं तावकी देवकी ते
माता मित्रं वलरिपुसुतस्त्वय्यतोऽन्यन्न जाने॥ 32 ॥

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तुभ्यं नमः।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति सर्वमेतदखिलं हे कृष्ण रक्षस्व माम्॥ 33 ॥

तत्त्वं प्रसीद भगवन् कुरु मय्यनाथे
विष्णो कृपां परमकारुणिकः किल त्वम्।
संसारसागरनिमग्नमनन्त दीनम्
उद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि॥ 34 ॥

नमामि नारायण पादपङ्कजं
करोमि नारायण पूजनं सदा।
वदामि नारायण नाम निर्मलं
स्मरामि नारायण तत्त्वमव्ययम्॥ 35॥

श्रीनाथ नारायण वासुदेव
श्रीकृष्ण भक्तप्रिय चक्रपाणे।
श्रीपद्मनाभाच्युत कैटभारे
श्रीराम पद्माक्ष हरे मुरारे॥ 36॥

अनन्त वैकुण्ठ मुकुन्द कृष्ण
गोविन्द दामोदर माधवेति।
वक्तुं समर्थोऽपि न वक्ति कश्चित्
अहो जनानां व्यसनाभिमुख्यम्॥ 37॥

ध्यायन्ति ये विष्णुमनन्तमव्ययं
हृत्पद्ममध्ये सततं व्यवस्थितम्।
समाहितानां सतताभयप्रदं
ते यान्ति सिद्धिं परमाञ्च वैष्णवीम्॥ 38॥

क्षीरसागर तरङ्गशीकरासारतारकित चारुमूर्तये।
भोगिभोग शयनीयशायिने माधवाय मधुविद्विषे नमः॥ 39॥

यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ
मित्रे द्विजन्मवरपद्म शरावभूताम्।
तेनाम्बुजाक्ष चरणाम्बुज षट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण॥ 40॥

॥ श्री मुकुन्दमाला समाप्ता॥